लोकप्रियसाहित्यग्रन्थमाला–71

श्रीसरस्वतीविग्रहं देशिकाचार्यविरचितः

# व्युत्पत्तिवादपरिष्कारः

प्रधानसम्पादकः

**प्रो. परमेश्वरनारायणशास्त्री**

कुलपतिः

सम्पादकः

**डॉ. एन्.आर्. कण्णन्**



**राष्ट्रिय-संस्कृत-संस्थानम्**

मानितविश्वविद्यालयः, नवदेहली

लोकप्रियसाहित्यग्रन्थमाला–71

श्रीसरस्वतीविग्रहं देशिकाचार्यविरचित:

# व्युत्पत्तिवादपरिष्कार:

प्रधानसम्पादक:
**प्रो. परमेश्वरनारायणशास्त्री**
कुलपति:

सम्पादक:
**डॉ. एन्.आर्. कण्णन्**
कुलपतिचर: (प्र.)
राष्ट्रियसंस्कृतसंस्थानम्
प्राचार्य:, गङ्गानाथझापरिसर:
इलाहाबाद: (उ.प्र.)

**राष्ट्रियसंस्कृतसंस्थानम्**
( भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीन:
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायित: मानितविश्वविद्यालय: )
**नवदेहली**

**प्रो. पी.एन. शास्त्री**
कुलपति
**राष्ट्रिय संस्कृत संस्थान**
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
('ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं
प्रत्यायन परिषद् द्वारा मान्यता प्राप्त)

**Prof. P.N. Shastri**
Vice-Chancellor
RASHTRIYA SANSKRIT SANSTHAN
Deemed to be University
(Under MHRD, Govt. of India)
(Accredited by NAAC with 'A' Grade)

# पुरोवाक्

तार्किकशिरोमणेर्गदाधरभट्टस्य शाब्दबोधप्रक्रियाधिगमेऽप्रतिमं योगदानं वर्तते। तत्प्रणीतो गभीरविचारसंवीतो ग्रन्थो "व्युत्पत्तिवादः" सुधियां समाजे नितान्तमात्तादरः। ग्रन्थेऽस्मिन् सप्तानां विभक्तीनाम् अर्थाः, तेषां समभिव्याहृतधात्वाद्यर्थे अन्वयप्रकारः, विशिष्टशाब्दबोधप्रकारः, तदुपयोगिकार्यकारणभावश्च नानाविधयुक्तिप्रदर्शनपूर्वकं प्रतिपादिताः। शाब्दबोधविषयीभूतानां पदार्थानां यथास्थलं भेदरूपः संबन्धः, अभेदरूपः संबन्धश्च व्युत्पादितः। प्रातिपदिकार्थः, सुबर्थः, धात्वर्थः, लकारार्थः, णिच्-सन्-क्यच्-काम्यच्प्रत्ययानामर्थाः, स्त्रीप्रत्ययार्थः, तद्धितार्थः, कृदर्थश्च तत्तत्सन्दर्भानुसारेण सन्दृब्धाः, तेषां पदार्थान्तरेण अन्वयप्रकाराश्च सयुक्तिकं निरूपिताः।

तादृग्गाम्भीर्ययुतस्य ग्रन्थरत्नस्य रहस्यानि विवरीतुं, तन्निष्ठानां विषयाणां परिष्कारं कर्तुं "व्युत्पत्तिवादपरिष्कारः" इत्यभिधाना व्याख्या श्रीसरस्वतीविग्रहं देशिकाचार्येण व्यलेखि। अत्र स्थाने-स्थाने व्याख्याकारेण स्वकीयं स्वतन्त्रमभिमतमपि न्यवेशि। अनेन ग्रन्थस्यास्य महत्त्वम् इतोऽप्यधिकं समेधितम्। एतावताऽनेहसाऽप्रकाशित-स्यास्य ग्रन्थस्य प्रकाशनेन विदुषां बुभुत्सूनां च महोपकारः सेत्स्यतीत्यत्र संशीतिलवोऽपि नावलोक्यते।

ग्रन्थसम्पादकेभ्यो न्यायविद्याविशारदेभ्यः डॉ. एन्.आर्. कण्णन् महोदयेभ्यो हार्दान् साधुवादान् अभिव्यज्याऽऽशासे यत् प्रकाशनादूर्ध्वं ग्रन्थोऽयं भगवत्या भारत्याः शोभावर्धनाय प्रकामं कल्पिष्यते।

प.ना.शास्त्री

**परमेश्वरनारायणशास्त्री**
कुलपतिः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

56-57, Institutional Area, Janakpuri, New Delhi-110058 Ph.: (O) 28523949 (Fax) 28521948
EPABX : 28524993, 28521994, 28524995 E.Mail : rsks@nda.vsnl.net.in, rskspvc@yahoo.com

तादृशतात्पर्येण घटो नित्य इति प्रयोगापत्तिर्न सम्भवति, किं तु चित्रव्रज इत्यत्र व्रजपदार्थैकदेशभूतस्य गोः जात्यतिरिक्ततया तस्य गोत्वरूपान्वयितावच्छेदक-रूपेणोपस्थितेस्सत्वात् पदार्थैकदेशान्वयाङ्गीकारे तत्राभेदसम्बन्धेन चित्रपदार्थान्वया-पत्तिः। ततश्च चित्रव्रज इत्यत्र चित्राभिन्ना गौरिति शाब्दबोधापत्तिः। तत्र तु चित्राभिन्नं गोस्थानमित्येव शाब्दबोधोऽनुभूयते। अतोऽत्र निरुक्तरीत्या मुख्यविशेष्यता-सम्बन्धेन वृत्तिज्ञानजन्योपस्थिते कारणत्वमङ्गीकृत्य व्रजपदार्थैकदेशभूतस्य गोश्च प्रकारतासम्बन्धेनैव उपस्थिततया मुख्यविशेष्यता सम्बन्धेन वृत्तिज्ञानजन्योपस्थिते-रसत्वेन न चित्राभिन्नागौरिति शाब्दबोधापत्तिरिति तदर्थं पदार्थः पदार्थेनैवान्वेतीति व्युत्पत्तिरवश्यमभ्युपगन्तव्येति सयुक्तिकं स्थापितम्।

अत्रेदं विचार्यते–

पदार्थः पदार्थेनान्वेति न तु तदेकदेशेनेति नियमाङ्गीकारे चैत्रस्य गुरुकुल-मित्यत्र षष्ठ्यर्थनिरूपितत्वस्य गुरुकुलमित्यत्र गुरुपदार्थैकदेशभूत गुरुत्वेऽन्वयानुप-पत्त्या शाब्दबोधानुपपत्तिस्स्यात् अतः किञ्चिन्निष्ठप्रकारतानिरूपितविशेष्यता-सम्बन्धेनेत्यत्र विशेष्यतायां ससंबन्धिकावृत्तित्वरूपविशेषणं देयं, तथा सति चैत्रस्य गुरुकुलमिति वाक्यजन्यचैत्रनिरूपितगुरुत्वाश्रय गुरुत्पाद्यकुलमिति शाब्दबोधे भासमानायाः गुरुत्वनिष्ठविशेष्यतायास्ससम्बन्धिकपदार्थवृत्तित्वेन तदवृत्तित्वाभावेन कार्यतावच्छेदकानाक्रान्ततया तत्र गुरुत्वस्य मुख्यविशेष्यतासम्बन्धेन वृत्तिज्ञानजन्यो-पस्थितेरभावेऽपि नैकदेशान्वयप्रयुक्तशाब्दबोधानुपपत्तिः इत्येकं समाधानम्।

अत्रैव शब्देन्दुशेखरकारेण षष्ठ्याः न निरूपितत्वमर्थः किं तु गुरूत्पाद्यत्वमेव, तत्र च चैत्रपदार्थस्य स्वप्रतियोगिकत्वसम्बन्धेनान्वयः। गुरूत्पाद्यत्वघटकीभूतगुरुत्वस्य वस्तुतश्चैत्रप्रतियोगिकत्वेन गुरूत्पाद्यत्वस्यापि तादृशगुरुत्वघटितत्वात् चैत्रप्रति-योगिकत्वमव्याहृतम्। षष्ठ्यर्थस्य च कुलपदार्थ एवान्वयः इति नात्र पदार्थैकदेशन्वयप्रयुक्तव्युत्पत्तिविरोधः शक्य शंक इति प्रकारान्तरेण समाहितमिति प्रत्यपादयन्। परं तु नेदं समाधानं सुन्दरमिति, ग्रन्थकृतैव खण्डितम्। गुरुकुलपदलभ्यांशस्य षष्ठीत एव लाभेन विशेष्यविशेषणभावभेदमात्रपर्यवसायिनो गुरुकुलपदस्य निष्फलत्वापत्तेः।

किं च चैत्रस्य गुरुकुलं न इत्यत्र षष्ठ्याः निरूपितत्वार्थकत्वे चैत्रनिरूपित-गुरुत्वाश्रयगुरूत्पाद्यकुलत्वस्याऽभावप्रतियोगितावच्छेदकत्वं वक्तुं शक्यते, गुरूत्पाद्यत्वस्यैव षष्ठ्यर्थत्वे तु निरुक्तधर्मापेक्षया चैत्रप्रतियोगिकगुरूत्पाद्यत्व-

राष्ट्रियसंस्कृतसंस्थानम्

( भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः,
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः मानितविश्वविद्यालयः )

56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058

दूरभाष : 011-28524993, 28521994, 28520977

email : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in

राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः मानितविश्वविद्यालयः)
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058
दूरभाष : 011-28524993, 28521994, 28520977
email : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in